National Journal of Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2024;** 1(57): 229-231
© 2024 NJHSR
www.sanskritarticle.com

**डॉ. प्रियरञ्जनरथः**
संविदाध्यापकः,
धर्मशास्त्रविद्याशाखा,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
श्रीसदाशिवपरिसरः, पुरी

**Correspondence:**
**डॉ. प्रियरञ्जनरथः**
संविदाध्यापकः,
धर्मशास्त्रविद्याशाखा,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
श्रीसदाशिवपरिसरः, पुरी

# धर्मशास्त्रे युगप्रवर्त्तकरूपेण राज्ञः योगदानम्

**डॉ. प्रियरञ्जनरथः**

"सर्वेषु समाजेषु प्रजानां शासनस्यावश्यकता प्रत्यक्षं विद्यते। शासनस्य मूलस्त्रोतः पुरा राजा एवासीत्। राजकीयव्यवस्थाया विपुलपरिधौ प्रजापरिपालनं धर्मसंस्थापनं पापानां निग्रहणं शान्तिव्यवस्थापनं च शाश्वतरूपेणान्तर्भूता भवति । राज्यपालनार्थं कश्चन क्षत्रियः तिष्ठति। स च क्षत्रियः यथाशास्त्रं संस्कारैः संस्कृतो भूत्वा ततः परं राज्यभारं वहति। यथोक्तं मनुना -

ब्राह्मं प्राप्तेन संस्कारं क्षत्रियेण यथाविधि।
सर्वस्यास्य यथान्यायं कर्त्तव्यं परीरक्षणम्[1]।।

भारतवर्षस्य सनातनसंस्कृतेः सुरक्षार्थं महापुरुषाणां जन्म काले कालेऽभूदिति पौराणिकी वार्ता। श्रीमद्भगवद्गीतायामपि[2] कथितमस्ति यत् स्वयं भगवान् धरातले धर्मरक्षार्थं अधर्मविनाशार्थं यथा अवतरति तथा राजरहिते राष्ट्र सर्वतोभावेन प्रजाः भयाकुलिताः भवन्ति । दुर्बलाः सवलैः सर्वदा पीडिताः स्युः। बलवन्तः पुरुषाः सर्वदा मात्स्यन्यायेन दुर्बलान् ग्रसन्ते। तदर्थं राजा राज्ये राजकार्यार्थमवतरति। यस्मादराजके जगति बलवद्भयात् सर्वतः प्रचलिते सर्वस्यास्य चराचरस्य रक्षायै ईश्वरेण राजा सृष्टः। तस्मात्तेन रक्षणं कार्यम् । यथाह मनुः -

अराजके हि लोकेऽस्मिन् सर्वतो विद्रुते भयात् ।
रक्षार्थमस्य सर्वस्य राजानमसृजत्प्रभुः[3] ।।

वैदिककालादेव राजकर्मपरिधिः सुविपुलोऽभवत् । वैदिकसंस्कृतेः प्रथमसम्राजे वरुण इन्द्रश्च बभुवतुः । वरुणस्य कार्यवृत्या राज्ञो नित्यकार्याणि प्रतीयन्ते। तद्यथा प्रजाकल्याणम्, तासां विपत्तौ रक्षणम्, तासामभ्युदयः, पापानां दण्डाधानम्, ऋतस्य प्रतिष्ठानं चेति राज्ञः कर्त्तव्यानि वरुणादर्शानुसारं सन्ति । इन्द्रस्य कार्योद्योगेन राज्ञः पराक्रमा आदर्शभूताः । तद्यथा शत्रुभिर्युद्धम्, पापानां विनाशनम्, दस्युविजयः, आर्याणामुत्थापनं चेति राज्ञः कर्तव्यानि भवन्ति । महाभारते वर्णितमस्ति यत् -

यज्ञं देहि प्रजां रक्ष धर्म समनुपालय ।
अमित्रान् जहि कौन्तेय मित्राणि परिपालय[4]।।

प्रजानामभ्युदयाय महाभारते राजा प्रजावृतं निवेदयितुं चारान् नियुक्तवान्, राजमार्गाणां निर्माण कृतवान् रोगिणामुपचारे वैद्यान् अधिकृतवान्, नागरिकाणां मनोरञ्जनार्थ नटमल्लादीन् व्यापारितवांश्च। प्रभविष्णुरासीत् पुरातनो राजा । महाभारतानुसारं तु –

राजा कृतयुगस्त्रष्टा त्रेतायां द्वापरस्य च ।
युगस्य च चतुर्थस्य राजा भवति कारणम्[5] ।।

तस्मिन्युगे राष्ट्रस्यौद्योगिकाभ्युदयाय राज्ञः प्रयत्नः श्लाघ्योऽभवत् ।

राष्ट्रस्य प्रायशः सर्वासामाधिभौतिकप्रवृत्तीनां नियन्त्रणाय विविधानां विभागानामध्याक्षाः नियुक्ताः । राजा प्रजाः पीडकेभ्यः सर्वथाऽरक्षत् । अर्थशास्त्रे राजा धर्मप्रवर्तकोऽभिमतः । नववसतयोः राजभिः

कारिता। प्रजाविपत्तीनां निवारणाय राजानः सदैवोद्योगपरायणाः बभूवुः। ते प्रायः युद्धभूमिषु राष्ट्ररक्षायै अग्रस्थानमलंचक्रुः। बहवो राजानः स्वयं प्रजानां दशां ज्ञातुं ग्रामाद् ग्रामं भ्रमन्ति स्म। तेषां तात्कालिकचेष्टाभिः प्रजानां सुखमुद्भवत्। प्राचीनकाले शिक्षायाः व्यवस्था आचार्याणामाश्रमेषु ब्रभूव। किन्तु कालान्तरे शिक्षायाः विस्तारे राजकीयसहायताया अपेक्षा बभूव। राजानोऽपि शिक्षा-प्रसाराय समुत्सुका बभूवुः। राजभिः संचालिता बह्व्यशिक्षणसंस्थाः बभूव । शिक्षाभवनानि राजभिर्निर्माणितानि ।

राज्ञः कर्मपरिधिः संक्षेपेण वर्णाश्रमधर्मरक्षापरं बभूव। तदनुसारं सर्वे वर्णाश्रमिणो निजाभ्युदयं कर्तुं चेष्टितवन्तः। राज्ञः प्रयत्नेन ब्रह्मचारिणः शिक्षां प्राप्तवन्तः, गृहस्था उद्योगपरायणाः सुखेन समृद्धि प्राप्तवन्तः, वानप्रस्थाः वनानां शान्तिपरिसरे तपसः तत्वज्ञानस्य च संवर्धनं कुर्वन्ति स्म। संन्यासिनोऽपि सर्वत्र प्रचारक्षेत्रमनुभवन्ति स्म। सर्वेषां वर्णानां स्वकीयोद्योगेषु नियोजनं तत्रत्यबाधानां निवारणं च राज्ञः कर्तव्यमासीत् । तत् परिलक्ष्य कालिदासेनामरवाक्यमुद्धाटितम् -

प्रजानां विनयाधानाद्रक्षणाद्मरणादपि ।
स पिता पितरस्तासां केवलं जन्महेतवः[6]।।

धर्मशास्त्रे युगप्रवर्तकरूपेण राज्ञः स्थानमतीव महत्वपूर्ण परिलक्ष्यते। स्वयं राजा युगस्य निर्माता भवति। सुवर्णयुगस्य प्रवर्त्तक राजाऽऽसीत्। यथोक्तं शुक्रनीतौ -

युगप्रवर्तको राजा धर्माधर्मपरिक्षणात् ।
युगानां न प्रजानां न दोषः किन्तु नृपस्य तु[7]।।

'यथा राजा तथा प्रजा' इति सिद्धान्तानुसारं राज्ञः चरित्रस्य युगप्रवर्तकरूपेणातिशयं महत्वं विद्यते। भारतीयराज्ञः स्वरूपं दिव्यं भवतीति मनुना[8] पर्यालोचितम्। वैदिककालात् भारते राजा इन्द्रविष्णुवरुणादीनां देवानां प्रतिनिधिरमन्यत्। इन्द्रदर्शनमनुसृत्य राजा विजेता बभूव। वरुणादर्शमनुसृत्य स न्यायपरायणोऽभवत्। विष्णोरादर्शमनुसृत्य राजा प्रजापालकचाभवत्। अग्नि-वायु-सूर्य-चन्द्र-यम-वरुण-महेन्द्रानामंशान् सारभूतानाकृष्य राजानमसृजत् ब्रह्मा। भूमिपः न्यूनवयस्कश्चेत् तथापि सः केनापि नावमन्तव्यः। स राजा अत्र पृथिव्यां देवानां भक्तिबलेन नररूपं धारयित्वा तिष्ठति[9]।

राजा राज्यमिति प्रकृतिसंक्षेपः। राज्ञः सद्भावे हि राज्यस्य स्थितिरिरिति सम्भाव्यते । राजा एव राज्यं परिचालयति। राजा धर्मसिद्धयर्थ पुनः पुनः रूपं धारयति[10] ।

राजा चेत् राज्ये न स्यात् दण्डप्रणयनं वा सम्यक्तया न कुर्यात्तर्हि राज्ये सबलाः दुर्बलान् ग्रसेयुः । तदर्श सर्वप्राणिनां रक्षकत्वेन दण्डं धर्मत्वेन ब्रह्मा सृष्टवान्[11]।

तीक्ष्णदण्डो हि भूतानामुद्वेजनीयः। मृदुदण्डः परिभूयते क यथार्ह-दण्डः पूज्यः। सुविज्ञात प्रणीतो हि दण्डः प्रजा धर्मार्थकामैर्योजयति। दुष्प्रणीतः कामक्रोधाभ्यामज्ञानाद् वानप्रस्थपरिव्राजकानपि कोपयति। अप्रणीतो हि मत्स्यन्यायाा यमुद्भावयति। दण्डधराभावे बलवन्तो दुर्बलान् हिंस्युः । राजा सर्वान् विषयान् सम्यग् विचार्य यथायथं दण्डः प्रयुञ्जीत, तेन च सः प्रजारञ्जकः स्यात्। अविचारेण दण्डप्रयोगे तु सर्वाः प्रजाः विनाशयति। समीचीनः शासनविधिः कौटल्येन प्रस्तुतः। तद्यथा उपस्थानगतः कार्यार्थिनामद्वारसङ्ग कारयेत्। दुर्द्दर्शो हि राजा कार्याकार्य-विपर्यासमासन्नेः कार्यते। तस्मादेवताश्रमपाषण्डश्रोत्रिय-पशुपुण्यस्थानानां बालवृद्धव्याधितानाथानां स्त्रीणां च क्रमेण कार्याणि पश्येत्।

प्रजासुखे सुखं राज्ञः प्रजानां च हिते हितम् ।
नात्माप्रियं हितं राज्ञः प्रजानां तु प्रियं हितम्[12]।।

राजा सम्यक्तया यदि दण्डप्रदानं करोति तर्हि प्रजाः सुखेन तिष्ठन्ते। दण्डप्रदानं यदि न कुर्यास्तदां देशे अराजकता दृश्यते। दण्डेनैव जनः नियमितः सन् सन्मार्गेऽवतिष्ठते[13]। राजा धर्ममाश्रित्य निवसते। राज्ञः शरीरं न आमोदप्रमोदाय सुकर्त्तव्य पालनाय तथा शरीरमाध्यमेन पृथिवीरक्षणार्थ प्रयुक्तं भवति[14]। स्वधर्मानुष्ठाननिरतानां ब्राह्मणा-दिवर्णानां ब्रह्मचर्याद्याश्रमाणां रक्षायै विश्वस्स्रष्टा राजानं सृष्टः[15]। एवं भूता राजा शिलोच्छेवृत्या यदि जीवेत् तर्हि जले तैलविन्दुरिव कीर्त्तिलकि विस्तारमेति तद्व्यतिरेकेण जने धृतविन्दुरिव कीर्त्तिः लोके संकोचयति। कामज क्रोधजादिव्यसनविमुक्तो धर्मनिष्ठो नीतिनिष्ठो नृपः स्वात्मानं प्रजाश्च व्यसनेभ्यः संतार्य्य महत्सुखे व्यवस्थापयति। सतां रक्षणार्थ दुर्वृत्तदमनमप्यपेक्षितं भवति, तेन दुर्वृत्तानामपि कल्याणमेव भवति । तदर्थमेव राजधर्मेषु युद्धमपि प्रमुखधर्मरूपेण परिगणितं भगवतां । यथा -

यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतम् ।
सुखिनः क्षत्रियाः पार्थ लभन्ते युद्धमीदृशम्"[16] ।।

मातृभूमेर्धर्मस्य स्वत्वस्य प्रजानाञ्च रक्षणायोपस्थिताद् युद्धाद-पसरणं महते दोषाय भवतीत्यप्युक्तम् ।

अथ चेत्त्वमिमं धर्म्यं संग्रामं न करिष्यसि ।
ततः स्वधर्मं कीर्तिञ्च हित्वा पापमवाप्स्यसि[17]।।

क्षत्रियवर्णोद्भवः पुरुषः एव राजा भवितुमर्हति। क्षत्रिय एव राजा भवितुं योग्य इति मनोः[18] मतम् । अन्यत्र कुल्लूकमतानुसारं यः प्रजाः शास्ति, परिपालयति रक्षति वा स राजपदवाच्यः। मनुरपि[19] कथयति आपात्काले राज्ये सम्प्राप्ते ब्रह्मणोऽपि राजा, सेनापतिः दण्डाधिपतिर्वा भवेदिति। राजन् शब्दः नृपतिनिमित्तं प्रायः प्रयुज्यते। महाभारते शब्दोऽयं रञ्जधातोः लोकरञ्जनार्थ एवं प्रयुक्तः यथा - 'रञ्जिताध प्रजाः सर्वास्तेन राजेति शब्द्यते'[20] । राजतन्त्रवादिना शुक्रेण राज्ञो महत्त्वं सर्वतोऽधिकमाकल्पितम् । तन्मते राजा राज्यस्य प्राणः।

**पादट्टीपणी -**

1 म.स्मृ. ७/२

2 यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ।।
परित्राणाय साधूनां विनाशाय च दुष्कृताम्।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ।। श्री.भ.गी. ४/७-८

3 म.स्मृ. ७/३

4 महा.शा. १५/५३

5 महा. शान्ति. ६९/९८

6 भारतस्य. सां.नि. पृ. २६५

7 शु.नी. ४/१/६०

8 इन्द्रानिलयमार्काणामग्नेश्च वरुणस्य च।
चन्द्रवित्तेशयोश्चैव मात्रा निर्हृत्य शाश्वतीः।।
यस्मादेषां सुरेन्द्राणां मात्राभ्यो निर्मिते नृपः।
तस्मादभिभवत्येष सर्वभूतानि तेजसा।। म. स्मृ. ७/४-५

9 मनु. ७/८

10 मनु. ७/१०

11 मनु. ७/१४

12 मनु. ७/१९-२२

13 कौ. अ.शा. १/१९

14 ध.शा.इ.१/६०३

15 मनु. ७/२२

16 मार्कण्डेय. पु. १३०/३३ (६.शा.इ. ६०४)

17 मनु. ७/३५

18 श्री.भ.गी. २/३३

19 मनु. १२/१००

20 महा. अनु. ५९/१२५